International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 22-24
© 2018 IJSR
www.anantaajournal.com
Received: 07-11-2017
Accepted: 08-12-2017

**डॉं वृजमोहन शर्मा**
व्याख्याता–साहित्य, श्रीमती लाडदेवीशर्मापंचोलीआदर्शसंस्कृत महाविद्यालय, बरून्दनी, तह–माण्डलगढ, जि– भीलवाडा, राजस्थान, भारत

**Correspondence**
**डॉं वृजमोहन शर्मा**
व्याख्याता–साहित्य, श्रीमती लाडदेवीशर्मापंचोलीआदर्शसंस्कृत महाविद्यालय, बरून्दनी, तह–माण्डलगढ, जि– भीलवाडा, राजस्थान, भारत

# आनन्दवृन्दावनचम्पूकाव्यशास्त्रीयपरिशीलनम् पृ01

**डॉं वृजमोहन शर्मा**

**प्रस्तावना**
काव्यशब्देन ''कवेः कर्म'' इति प्रतीतिः भवति काव्यरचनाकारश्च कविरिति कथ्यते, कवि शब्दोऽयं नानार्थकाः। वैदिकेषु मंन्त्रेषु कवि शब्दस्यार्थः अग्नि–सूर्य–सोम–मेधाविशक्तिदर्शि प्रभृतिष्वर्थेषु प्रयुक्ताः, ततः परमोपनिषत्सु ब्रह्मवाचकः श्रेण्यसंस्कृतकाले च वर्णयितृत्वेन प्रसिद्धं प्राप्तः। एवमेव शब्दसृष्टेः विधाता कविमानसप्रत्यक्षेण जागतिक प्रत्यक्षेण च समुद्भूतान् भावान्गद्यैः पद्यैः शब्ददेहं प्रदाय प्रस्तौति, तदेव काव्यमिति प्रसिद्धम्।
काव्यस्य शब्दार्थगतप्रयोगव्यवस्थां साधयितुं विद्वद्भिः ये नियमाः सूचिताः संकलिताश्च सर्वं शास्त्ररूपेण महत्त्वं भजन्ते। शास्त्रशब्दस्यव्युत्पत्तिः शासनात् शंसनाच्च शास्त्रमिति द्विधाक्रियते। प्रथमव्युत्पत्या विविधनिषेधात्मकं शासनमिति,द्वितीयशास्त्रव्युत्पत्या च गूढतत्त्वं च प्रतिपादनमिति यत्र विद्यते तत् शास्त्रं सिद्धयति। एवं काव्यानां शास्त्रं काव्यशस्त्रं साहित्यशस्त्रं भवति। काव्यशास्त्रस्यपरिधौ वहवो विषयाः समाहिताः भवन्ति। तेषु मुख्यत्वेन छंन्दासि रसारीतया गुणालंकारश्चसमाविसन्ति। चम्पूकाव्यपरिशीलने चैतेषां विचारो अत्यावश्यकः प्रतिभाति। अतः क्रमेण किंचिद् विचार्यते यत्– आनन्दवृन्दावनचम्पूकाव्यछंन्दसां परिशीलनम्–छंदांसि कवेः कर्मणः अभिन्नांगत्वेन तिष्ठन्ति। छंन्दसां सहाय्येन भावानां प्रवाहो अविरलतया पुरः पुरो वर्धते। तस्मिन्नेव प्रवाहे निर्गता काव्यधारा किमप्यलौकिकं सौन्दर्यं पुष्णाति। साहचर्यं च विद्यते। नवनवाः कल्पनाः उदीयन्ते च। छन्दपरिचयः :–वैदिकलौकिकसंस्कृतशास्त्रेषु छन्दशास्त्रस्य महत्त्वपूर्णस्थानं वर्तते।छन्दशब्दस्य अर्थद्वयमस्ति– आच्छादन। छन्दांसि छादनात् ।अस्यार्थस्य रस–भावमाच्छादितो अस्ति ।

द्वितीयार्थः –आह्लादन। चदिधातुतः निष्पन्नः चन्दयन्तिआह्लादयन्ति इति छन्दांसि इति व्युत्पपत्तया चदि आह्लादने धातोःअसुन् प्रत्यये कृते चकारस्य
पृ02
स्थानेछत्वं विधायछन्दः निष्पन्नःलौकिकएवं प्रचीनवैदेशिकसाहित्येछन्दमाध्यमेन विपुलज्ञानराशिमाच्छादयति यथोच्यते –

> शिक्षा कल्पो व्याकरणं निरूक्तंछन्दसां चयः।
> ज्योतिषामायनं चैव वेदाङ्गानिषडेव ।।

पणिनीयशिक्षायाम्–

> छन्दःपादौ तु वेदस्य हस्तो कल्पोऽथ पठ्यते।
> ज्योतिषामायनं चक्षुनिरूक्तंश्रोत्रमुच्यते ।।
> शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
> तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते ।।1।

अत एव छन्दशास्त्रस्य प्रसिद्धसूत्रोऽस्ति–यमाताराजभानसलगाः । छन्दमाध्यमेन लयस्य स्वराणां या संगीतमयी झंकृतिः श्रूयते सा आनन्दायिनी भवति चम्पूकाव्यं गद्यपद्यमयमिव भवति चम्पूकाव्यनिमार्णेगद्यस्य साहय्यं नात्यल्पं विद्यते 'किंच गद्यं कवीनां निकशं वदन्ति '' इति किं वदन्त्यपिक विताया गद्यविधेः प्रयोगं सुरूचिरं मन्यन्ते तथापि लोके कविकर्मणा साफल्यं पद्येष्वेव प्रकटी भवति । अत एव समस्ते अपि संस्कृतवाङ्मये चम्पूकाव्यसाहित्यस्य वैशिष्ठ्यं दृश्यते । पूर्वेविद्वांसःद्वित्राण्येव छन्दांसि प्रयुज्यपुराणमुपपुराणानां निमार्णं विधायसन्तुष्टवन्तःपरम इदानीं च नवीन –अस्मिन् युगेछन्दसां

वैचिन्र्यताया अपि महत्त्वं दृश्यते । छन्दशास्त्रप्रणेतारः पिंगलनामादय एकं छन्दसां आरभ्यनैकेषां वर्णानां गणानां यावत् छन्दसां नामानि लक्ष्णानि च

पृ03

व्यवस्थपयन् । आनन्दवृन्दावनचम्पूकाव्ये बहूनि छन्दांसि दरीदृश्यते। तेषां च नामानि उट्टंकिता यथा च–

1ः–शार्दूलविक्रीडितं लक्षणं यथा–सूर्याश्वैर्यादिभः सजौस तत गाः शार्दूलविक्रीडितम् ।2।

अन्याच्च ––

सूर्याश्वैमसजास्ताताः सः गुरवःशार्दूलविक्रीडितम्।।
काव्यमालादन्दशास्त्रमधिकृत्यशार्दूलविक्रीडितलक्षणमाह–ः
शार्दूलविक्रीडित मसौ जसौ तौमादित्यऋषयः ।। 3।।
वन्देकृष्णपदारविन्दयुगलं यस्मिन्कुरङ्गीदृशाम् ।
वक्षोजप्रणयीकृते विलसति स्निग्धोऽङ्रागः स्वतः ।।
काश्मीरं तलशोणिमोपरितनःकस्तूरिकां नीलमा ।
श्रीखण्डंनखचन्द्रकान्तिलहरी निर्व्याजमातन्वते।।।4।
ग्रीष्मवर्णनप्रसंगे यथा :–सीमन्ते नवनोपकं करतले लीलारविन्दं नव;
स्निग्धं लोध्ररजः कपोल फलके बन्धूकमालां गले ।
कर्णे मंजुल पल्लवं स्तवकिनं मल्लीसृजं कुन्तले ;
विभ्रत्यो व्रजसुसुभ्रुवः प्रतिदिनं कृष्णं सदोपासते ।

यमुनावर्णनम् यथाः–
स्तम्भास्तऽमीवङभ्यो नियत नियमितकुसुमिताः स्कन्धशाखस्तदीया;

पृ04

वल्लीनां पुष्पितानामपि विटपकुलैः कल्पिताच्छिदोषि ।
कैश्चिद् दारोऽपि भंगीविरचनरूचिराभित्तयः कैचिदन्यैः ;
पुष्पैः प्रालम्बचूडाकलसविरचनाचामरादीनि कैश्चित्। 5।
शिखरिणीलक्षणम् :– शिखरिणी यमौनसौ लौगृतुरूद्राः
रसैरूद्रैच्छिन्ना यमनसभलागः शिखरिणी।
पिवन्दुग्धं स्निग्धो दरदलितं बन्धूककलिका,
दलद्रोणिताम्राधरपुटम्चमत्कारकलया।
अमू चके लीलां शिशुः प्राणधमनि
समाकृष्ट्या सद्यः सफलकरणग्लानि विवशाम्।। 6।।
उपजाति– यत्रद्वयो रप्यमयोस्तु पादा, भवन्ति मेघाजितवादिबुद्धे।
विद्वद् भिराद्यैः परकीर्तिता सा प्रयुज्यतानिमिज्यत्जातिरेषा।।
स्यादिन्द्रवज्रा यदितौ जगौ गः।
उपेन्द्रवज्रा जतजा स्ततौ गौ ।
अनन्त रोदिरितलक्ष्मभाजौ,
पादौ यदि या वुपजात यस्ताः।।

छन्दशास्त्रानुसारेण उपजाति छन्दरसः लक्षणं यथा–
''आद्यन्तावुपजातयः:'' आद्यन्तौ इति अनन्तरोक्तौइन्द्रो वज्रयोः पादावाह। तदा तौ विकल्पेन यथेष्टं भवतः तदा'' उपजातयः'' प्रस्तारवशाच्च चतुर्दशप्रकारः

पृ05

जायन्ते। तन्नाम लक्षणोदाहरणादीनि प्रदर्शयन्ते यथा–1 कीर्तिः 2 वाणी 3माला 4 शाला 5 हंसी 6 माया 7 जाया 8 आद्रा 9 भद्रा 10 प्रेमा 11 रामा 12 ऋद्धिः 13 बुद्धिः 14 बाला ।। 5।। प्रा0 पिंगलसूत्र 2/122

यथा–आनन्दवृन्दावन नामधेयां।
चम्पूमिमां कृष्णचरितचित्रां ।।
मनोविनोदाय रसग्रहाणां।
चक्रे स्वमोदाय च कर्णपूरः।। 7।।

**इन्द्रवज्रा लक्षणमाह**

स्यादिन्द्रवज्रा यदितौ जगौ गः।
गेगोपगोपी निकरैः विलासो,
अलोकेऽपितस्मिन् भवितुं क्षमेत।
वाल्यादि लीलासुरनासलीले,
लोकं विना नार्हत् एव शोभाम्।

**मन्दाकान्ता लक्षणमाह**

मन्दाकान्ता जलधि षडगैर्म्भौनतौ ताद् गुरूश्चेद्।

**उदाहरणम्**

माकन्दानां कलितकलिका स्वादनः कोकिलोऽयम्,
चन्च चंचूयदयमनत् कण्ठमूलं ध्वनानः।
पृ06
ग्रासोभूत सह कलिकया यत्रलब्धावकाशो,
मूर्तोनादः कुहुरितिः वहिर्याति यत्र द्विरेफः।।8।।

**नर्कुटकच्छन्दसः लक्षणम्**

ध्यदसभिर्नजौभजजलासगु नर्कुटमिति।
यथा–जय जय नूयतेचिदा बबोधरसैकमयं,
घनरूचि चंन्द्र कस्तवक गौण्डिकहारभृतः।
च्लवन मालिकं कवलवेणु विषाणभृतो,
वपुरिद मद्भूतं व्रजपुरन्दर नन्दन ते।। 9।।

**अनुष्टुपछन्दः**

मनोज्ञाऽसि मनोज्ञाऽसि त्वं सर्वस्यैव देहिनः ।
देहिनः पतिरूपेण देवि !गोपेन्द्र नन्दनम् ।
एव मेव आर्या, हारिणी, वसन्ततिलकः इत्यादीनि छन्दांसि सुचारूतया
प्रयुक्तानि विद्यन्ते।

**आनन्दवृन्दावनचम्पूकाव्ये छन्दांसिमहत्त्वम्**

प्राणमात्राछन्दः । सर्वं चेदं स्थावरजंगं सप्राणमेवेह जीवति ।प्राणधारणं हि जीवनम् ।अतः प्राणापगमे निर्जीवं विनश्यति सर्वम् । स च प्राणः सर्वत्र व्यक्तिभेदभिन्नया कयाचिन्नियतयैव मात्रावस्थाय स्वप्रणीतंस्वान्तं

पृ07

शरीरमधितिष्ठतीति प्रतिपद्यते ।तत्र वाचिकप्राणःस्वरः इत्युच्यते।तन्मात्रावाचिक छन्दः। एवं भौतिक प्राणोवैश्वानरः, तन्मात्राच भौतिकच्छन्द इत्यनुसंधेयम् ।
मात्रा च पुनरवच्छेदः। यद्यपि च नियतासु वाक्षु प्रयुज्यते छन्दः शब्दसु अथापि नैतावता वागेव छन्दः शब्दवाच्येति भ्रमितव्यम् ।नीलश्वेतादिशब्दानाम् गुणवाचकतया जातिशब्दत्वेऽपिगुणिपरत्वेनोपचाराद् गुणशब्दत्व वदस्य छन्दः गुणशब्दत्वव्यवहारोपपत्तेः ।तस्मादवछछेदश्छन्द इत्येव सिद्धान्तः।। 9।।
अतएव आनन्दवृन्दावनचम्पूकाव्येछन्दः स्वतः सुन्दरं भवति । भाषामानवजीवन

स्यात्यन्तं ललितं मनोहरं तत्त्वमस्ति ।तस्याः प्रत्येकाशे तदीयाविशिष्टामोहकता तिष्ठति ।समुचितेनान्तरेण तथा भाव–सौन्दर्येण अस्माकं मनोध्यानं चाकर्षयन्ति ।
यद्यपि गद्येन साधारणतः एकबारं कथयित्वा विरम्यते चेत् ते शीघ्रमेवास्माकं स्मृतेर्दूरे भवन्ति । इदमेवकारणं यदृ गीतेषु ध्रुवपदानां तथा कवितायाः पदावलिनामप्यिावर्तनं विधीयते । इयं प्रथाऽद्यापि गायकेषु कविषु च वर्तते।छन्दःसु केवलं बन्धसौन्दर्यस्यैव प्राधान्यं न भवति परं तेषां ध्वनिसौन्दर्यमपि प्रभावं वर्धयति।इयमेव श्रुतिः सर्वत्राभिनन्दिता विद्यते यथा–

शब्दार्थ मात्रापि येन विन्दन्ति तेऽपि,यां मूर्च्छानामिव मृगाः कर्णपुटैः श्रवणैः
पिवन्ति, संरूद्धसर्वकरणप्रसराः भवन्ति चित्रार्पिता इव कवीन्द्रगिरं नुमस्ताम्।
तिलमात्रवैषम्यं न सहते तथैव छन्दसोऽपि वैषम्यं न स्वीकियते उक्तंच –
''यया न सहते कनकतुलातिलतुलितमदर्धादर्धनम् ।
तथा न सहते श्रवणतुला पंचछन्दस्कन्दोभङ्गेन ।।10।।

पृ08

आन्दवृन्दावनचम्पूकाव्ये रसपरम्परायांवर्णनम् :– आन्दवृन्दावनचम्पूकाव्ये रसपरम्परायां भक्तिरसविचारः संस्कृतसाहित्याचार्यैः भक्तिरसो रसत्वेन नाङ्कृतो अद्यापिप्रश्नतिष्ठति आचार्यभरतेन भक्तिर्नवरसरूपेण नवाभावत्वेन न कथिता तत्र कारणं तु तत्समक्षं भक्तिः परकाभिनेयग्रन्थाभाव एवासीत् तस्य विवेच्यं तु प्रधानत्वेनाभिनेय साहित्यमेवासीत् भरतो दाम्पत्येतर रतेश्चर्चामेव न करोति ।सर्वप्रथममस्याश्चर्यादण्डिनाकृता परं तेनापि भक्तिरसरूपेण नाङ्गीकृता यतस्तत्समक्षं भरतस्य मान्यतासीत् ।दण्डीआचार्येण भावात्मकपरि
–स्थितयोऽलंकारेषु परिगणिताः रसोऽपि रसवदलंकार एव प्रतीतिश्च प्रयोलंकारःप्रयोलंकारस्योदाहरणं कृष्णपरकमतः प्रतीयते यत्प्रतीत भगवद् विषयिणी प्रतीतिरेव तथा च''प्रेमप्रियतराख्यानम्'' भगवद् विषयकप्रीतिः लौकिकापेक्षयाप्रियतरा तथा च काव्यादर्शे उट्टंकितम् यत् –

इत्याह युक्तं विदरो नान्य तस्तादृशीधृतिः ।
भक्तिसमाराध्यः सुप्रतीतश्च ततो हरिः ।।11। काव्यादर्शः

सेमः सूर्यो–मरूद, भूमिर्व्योम, होताऽनलो , जलमतिमूर्तिरतिकम्यत्वां दृष्टुं देवके वयम् ।इत्यत्र रतिः श्रृंगार विषयिणीप्रतीतिश्च भगवद् विषयिणीति ।
दण्डिनोमते भक्तिः प्रेमालंकारे समायाति ं। भरतमनुस्मरन् दण्डी ''भक्तिम्''
पृथक् रसत्वेन नाङ्गीचकार इत्थं अष्टौरसाः यता रसयत्तास्मृताभिः रागः ।

**रूद्रटाचार्येणः** आचार्यरूद्रटो दण्डिनः प्रेयो ऽलंकारं प्रेमनित्यातिरिक्त रसरूपेण उद्भटे नैव रसत्वेनस्वीकृतासीत् स्नेहप्रकृतिः प्रेमान् संगीतशीलार्य नायको भवति स्नेहस्तु साहचर्या प्रकृतेः उपचारा वर्तते।

**श्लोक**

निर्व्याजमनोवृत्तिः सह नर्मसद्भाव पेशला लापः ।
अन्यो अन्यं प्रति सुहृदो व्यवहारोऽयं मतस्तत्र।। 12।।
अतएव सुहृदां स्नेहैव रसः इति रूद्रटाचार्यः स्वीकियते।

## संधर्व सूची


1. पाणि0शि041/42 वैदिकवा0 228पृ0
2. कविताकदम्बिनी पृ0 87
3. छन्दशास्त्रकाव्यमाला पृ0164।।
4. आ0वृ0च0प्र0स्त0श्लो01
5. आ0वृ0च0प्र01/71श्लो0/35पृ0
6. आ0वृ0च03/8/76पृ0
7. आ. वृ. च. 1/15/8 पृ.
8. आ.वृ.च. प्र.स्त./59 श्लो.पृ.30
9. आ.वृ.च.श्लो.109,137.146.पृ.सं 227